शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

नियमपरिवृत्ति-वाच्यानभिधानयोः को भेद इति विवेचनम्।

नियमः निश्चयः, तेन वक्तव्ये अनियमेनाभिधाने नियमे अनियमः, नियमे परिवृत्तिदोषः इत्युदाहरणं यथा —
'आपातसुरसे भोगे निमग्नाः किं न कुर्वते।'
अत्र आपात एव सुरसे इति नियमो वाच्यः।
ननु वाच्यस्यानभिधाने 'व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि कुप्यसि' इत्यत्र व्यतिक्रमलवमपि इत्यपि अत्र 'आपातसुरसे भोगे निमग्नाः किं न कुर्वते' इत्यत्र चैकतरस्यैव कोऽनयोर्भेदः।
अत्र नियमस्य वचनेनैव पृथग्भूत-नियमपरिवृत्तेर्विषयः इति। तन्न। तथा सत्यपि अनयोः शब्दार्थदोषत्वयोः नियामकाभावात्। एवं वाच्यानभिधानस्य शब्ददोषत्वे नियमानियम दोषस्य चार्थदोषत्वे नियामको न भविष्यति। तत्र का गतिरिति चेत्? अत्र - 'व्यतिक्रमलवं कं मे वीक्ष्य' इत्यादौ शब्दोच्चारणानन्तरमेव दोषप्रतिभासः। इह तु अर्थप्रत्यय अनन्तरम् इति भेदः।

एवं च शब्दपरिवृत्ति सहत्वं असहत्वाभ्यां पूर्वापूर्वोऽपि शब्दार्थदोषविभाग एवं पर्यवस्यति। यो दोषः शब्दपरिवृत्त्यसहः स शब्ददोष एव। यत्र पदार्थान्वय प्रतीति पूर्वं बोध्यः सोऽपि शब्ददोषः किन्तु योऽर्थप्रतीति अनन्तरम् बोध्यः सोऽर्थदोषः। एवं च अधिकपदत्वस्य शब्ददोषत्वेऽपि, अनियमे नियम तथा नियमपरिवृत्तेस्तु अर्थदोषत्वमिति।

अलमति पल्लवेन

उपेन्द्र दत्त
19/9/20
एसो० प्रो० साहित्य
रा० सं० म० महाविद्या०
कुरुक्षेत्र, हरियाणा

शास्त्रि द्वितीय खण्डस्य कृते (साहित्यम्)

'तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥'
पद्येऽस्मिन् व्यञ्जक निर्देशपूर्वकं व्यङ्ग्यार्थ विवेचनम् ।

---

'तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥'

अर्थात् श्रीकृष्णस्य अप्राप्त्या = वियोगेन हेतुना यन्महद् दुःखं तेन तद्भोगेन विलीनानि = नष्टानि, अशेषाणि = समस्तानि, पातकानि = अनेक जन्म सञ्चित पापानि, यस्याः सा तथोक्ता, तथा तस्य श्रीकृष्णस्य चिन्तया = भावनया, अहर्निशं ध्यानेनेति भावः । यो विपुलो = महान्, आह्लादः = आनन्दः, तेन तद्भोगेनैव क्षीणः नष्टः पुण्यस्य चयः = समूहः, यस्याः सा तथोक्ता, पापपुण्ययोः फलभोगनाश्यत्वात् । एतादृशी गोपिका श्रीकृष्णचिन्तनध्यानेन साक्षात्कुर्वती निरुद्धप्राणतया मोक्षं प्राप्ता ।

अत्राशेषचयपदप्रभावाद् अनेकजन्मसहस्रभोग्य दुष्कृत सुकृत फलराशितादात्म्य अध्यवसित तया भगवद्विरह दुःख चिन्ता आह्लादयोः प्रतिपन्नम् इति अतिशयोक्ति रूपं प्रतीतिः अशेष चय पद द्योत्या ।

अर्थात् अत्र श्रीकृष्ण वियोग दुःखचिन्ता आह्लादयोः अशेषं दुष्कृत सुकृत फलत्वेन अध्यवसित तयोः अवगतिः इति अतिशयोक्ति रूपम् अशेषचय पद प्राधान्येन व्यज्यते । साहित्यदर्पणकारेण च एवः सम्भवित वस्तुना पदगतालङ्कारध्वनेः उदाहरणत्वेन उपन्यस्तं पद्यमिदं दिक् ।

---

उपेन्द्र झा
18/8/20
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
कुरुक्षेत्र, हरियाणा

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

विश्वनाथोक्तं काव्यलक्षणं सोदाहरणं प्रतिपादनम्।

ननु पूर्वेषां काव्य लक्षणानाम् अव्याप्ति आदि दोष ग्रस्तानाम् न काव्यलक्षणत्वं सम्भवति। अतः काव्य लक्षणं किम् इति जिज्ञासायां साहित्य दर्पणकारः श्री विश्वनाथ आह —
'वाक्यं रसात्मकं काव्यम्' इति। रस एवात्मा सारस्यतया जीवनाधायको यस्य तत् वाक्यं काव्यम् इत्यर्थः। रस पदेन अत्र 'रस्यते = आस्वाद्यते यः स रसः' इति व्युत्पत्तियोगात् भाव रसाभास भावाभासादयोऽपि गृह्यन्ते। यत्र च वाक्ये न रसः नादृशो काव्यत्वमिति। अन्यथा 'देवदत्तो ग्रामं याति' इत्यत्र देवदत्तस्य तत् अनुसरण रूप व्यङ्ग्यः अवगते सति काव्यत्वं स्यात्। न च तथा रसत्व एव काव्यत्व अङ्गीकारात् इति। तत्र रसो यथा—

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः-
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं,
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥

अत्र उक्तरूपः पतिः उक्तरूपा च पत्नी आलम्बन विभावौ, शून्यं वासगृहम् इति उद्दीपन विभावः, चुम्बनं अनुभावः, लज्जाहासौ व्यभिचारिणौ, एतैरभिव्यक्तः सहृदयरति भावः शृङ्गारो रसः। एवम् भावादीनामपि उदाहरणानि ज्ञेयानि

इति दिक्

उपेन्द्र झा
18/8/20
एसो० प्रो० साहित्य
रा० उ० वि० दडावि०
पुरबेला, पूर्णियाँ

Aug 18, 2020